देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# श्रीशङ्करभगवत्पादविरचितसौन्दर्यलहर्यां भावसौन्दर्यम्

**स्वागतमिहिरः**
शोधच्छात्रः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

**मुख्यशब्दाः-**
काव्यात्मा, रसः, भावः, अभिव्यक्तिः, भक्तिः, औत्सुक्यम्

**शोधपत्रसारः-**

काव्यस्यात्मा रसः। आस्वाद्यमानत्वादिति व्युत्पत्त्या रसशब्देन रसादिः गृह्यते। अतः व्यज्यमानः भावोऽपि काव्यस्यात्मैव भवति। यद्यपि भावाभिव्यक्तिः सर्वेष्वपि काव्येषु प्राधान्येनाप्राधान्येनानुषङ्गिकतया वा भवत्येव तथापि स्तोत्रकाव्येषु शृङ्गारादिरसापेक्षया भावा एव प्राधान्येनाभिव्यज्यन्ते। श्रीशङ्करभगवत्पादानां सौन्दर्यलहरीकाव्यस्थं भावसौन्दर्यमुद्दिश्य अत्र विचारः क्रियते।

विभावेन अनुभावेन च व्यज्यमानः हर्षादिचित्तवृत्तिष्वन्यतमः 'भावः' इत्युच्यते। सौन्दर्यलहर्यां वर्तमानेषु भावेषु यद्यपि कविगत-देवीविषयकरति(भक्ति)भाव एव प्रधानस्तथापि तदुपस्कारकतया अन्येऽपि भावा अत्र समाविष्टाः सन्तीति दृश्यते। औत्सुक्यं व्रीडेत्यादयो भावा अपि यथायोग्यमवसरं प्राप्ताः सन्ति।

रसभावादीनां ध्वनिर्यत्र भवति तदुत्तमकाव्यमिति परिगण्यते। तया दृष्ट्या भगवतीविषयकभावप्रधानमिदं काव्यमप्युत्तमकाव्यपदभाग्भवति। अनया दृष्ट्या सौन्दर्यलहरीकाव्यं भावध्वनियुक्तत्वात् उत्तमकाव्यमेव भवति।

**शोधपत्रम्-**

काव्यस्यात्मा रसः। आस्वाद्यमानत्वादिति व्युत्पत्त्या रसशब्देन रसादिः गृह्यते। अतः व्यज्यमानः भावोऽपि काव्यस्यात्मैव भवति। यद्यपि भावाभिव्यक्तिः सर्वेष्वपि काव्येषु प्राधान्येनाप्राधान्येनानुषङ्गिकतया वा भवत्येव तथापि स्तोत्रकाव्येषु शृङ्गारादिरसापेक्षया भावा एव प्राधान्येनाभिव्यज्यन्ते। श्रीशङ्करभगवत्पादानां सौन्दर्यलहरीकाव्यस्थं भावसौन्दर्यमुद्दिश्य अत्र विचारः क्रियते।

विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति भरतमुनेः रससूत्रम्[1]। तथैव विभावेन अनुभावेन च व्यज्यमानः हर्षादिचित्तवृत्तिष्वन्यतमः 'भावः' इत्युच्यते।[2] तत्र,

**भगवद्विषयकरतिः(भक्तिः)**

भक्तिरालङ्कारिकाणां दृष्ट्या भाव एव, न तु रसः। भक्तेः रसत्वं भरतादीनां दृष्टिपथात् दूरमेव वर्तते। तच्च रसगङ्गाधरकारवचनैरेवं स्पष्टीभवति –

" अथ कथमेत एव रसाः, भगवदालम्बनस्य रोमाञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य भागवतादिपुराणश्रवणसमये भगवद्भक्तैः अनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात्। भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः। न चासौ शान्तरसेऽन्तर्भावमर्हति, अनुरागस्य वैराग्यविरुद्धत्वात्। उच्यते – भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः

"रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।
भावः प्रोक्तः----॥

इति हि प्राचां सिद्धान्तात्। न च तर्हि कामिनीविषयाया अपि रतेर्भावत्वमस्तु, रतित्वाविशेषात्। अस्तु वा भगवद्भक्तेरेव स्थायित्वम् कामिन्यादिरतीनां च भावत्वम्, विनिगमकाभावाद् इति वाच्यम्। भरतादिमुनिवचनानामेवात्र रसभावत्वादि व्यवस्थापकत्वेन स्वातन्त्र्ययोगात्। अन्यथा पुत्रादिविषयाया अपि रतेः स्थायिभावत्वं कुतो न स्यात्। न स्याद्वा कुतः शुद्धभावत्वं जुगुप्साशोकादीनाम् इत्यखिलदर्शनवैयाकुली स्यात्। रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्येत इति यथाशास्त्रमेव ज्यायः।" इति।

भज-सेवायाम् इत्यर्थकाद्धातोः क्तिन् प्रत्यये कृते भक्तिशब्दो निष्पद्यते। भक्तस्य स्नेहेन भगवत्सेवा भक्तिरित्युच्यते। श्रद्धा-विश्वास-प्रेमपरिप्लावितभक्तहृदयस्य मधुरमनोराग एव भक्तिः, यया भक्त-भगवतोः उपास्योपासकयोर्वा पारस्परिकतादात्म्यसम्बन्धस्य निर्धारणं भवति। सा भक्तस्य

---

[1] नाट्यशास्त्रम्-६ अध्यायः

[2] 'विभावादिव्यज्यमानहर्षाद्यन्यतमत्वं तत्वम्' र.ग-१(भावध्वनिनिरूपणम्)

निर्मलमानसान्निसृतस्य दिव्यप्रेमप्रवाहस्य भावधारैव, यया लौकिकविषयानन्दः स्वसमस्तकालुष्यं परिक्षाल्यालौकिकब्रह्मानन्दे परिणमति। भक्तानां सैव भक्तिः लौकिकालौकिकसमस्तसन्तापनाशिनी भक्तिः वर्तते।

---

इदानीं श्रीशङ्कराचार्यमते भक्तेः (उपासनायाः) प्रयोजनं स्वरूपञ्च कीदृशमिति पश्यामः। यद्यपि अद्वैतस्थापनाचार्यैः शङ्करभगवत्पादैः **ज्ञानविहीनः सर्वमतेन भजति न मुक्तिं जन्मशतेने**ति मानवजन्मनः परम-चरमपुरुषार्थस्य मोक्षस्यावाप्तिः ज्ञानैनैव भवतीति मोहमुद्गरे काव्यमयवचसा प्रतिपाद्य ज्ञानस्यैव सर्वोत्कृष्टं स्थानं दत्तं वर्तते, तथापि भक्तिर्न तैरवज्ञिता, न वोपेक्षिता। भक्तेरपि प्रामुख्यं तैर्दत्तमित्येतत् प्रमाणितं भवति तेषां कृतिषु। नो चेत्तैर्विरचितानि स्तोत्रकाव्यानि निष्फलानि भवेयुः। ब्रह्मज्ञानावाप्त्यै साधनं भक्तिरिति तेषाम् मतम्। तैर्विलिखिते उपनिषद्भाष्ये ब्रह्मसूत्रभाष्ये गीताभाष्ये च साक्षान्न, किन्तु परम्परया ब्रह्मज्ञानावाप्तिसाधनत्वेन भक्तिः प्रतिपादिता दृश्यते। छान्दोग्योपनिषदि 'ओमित्येतदक्षरमुद्गीथमुपासीत---' इत्यादेः सूत्रस्य भाष्ये, ' रहस्यसामान्यान्मनोवृत्तिसामान्याच्च यथाऽद्वैतज्ञानं मनोवृत्तिमात्रं तथाऽन्यन्यप्युपासनानि मनोवृत्तिरूपाणीत्यस्ति हि सामान्यम्—' इत्यादिवाक्यैः ब्रह्मावाप्तिसाधनेषु उपासनामुपवर्ण्य ततो ज्ञानसाधनद्वारा तस्य ब्रह्मावाप्तिसाधनत्वं समर्थितम्[3]।

तयैव भक्त्या सम्पूरितमस्त्येतत्काव्यम्। सर्वत्र सैव विलसति। सर्वे श्लोकाः तयैवौतप्रोताः। प्रथमश्लोक एव शिवः शक्त्या युक्तेत्यादिरीत्या भक्तेः प्रवाह एव दृश्यते-

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलह् स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥ [4]

अकृतपुण्यः त्वां प्रणन्तुं स्तोतुं वा न शक्नोति, तेन तादृशसामर्थ्यं अनुगृह्य त्वां स्तोतुं यथा प्रभवामि तथा कुरु इति प्रार्थ्यते। भगवतीस्तुतेरिच्छा तद्गतभगवतीविषयकरतेः सूचिकेति भक्तिरेवात्र आचार्यैः प्राधान्येनाश्रिता वर्तते।

सर्वस्यापि स्वचेष्टितस्य भवानीपरत्वेन तत्पूजाप्रकारतां प्रार्थयन्तः -

'जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्या पर्यायस्तव भवतु यन्मे विलसितम्'॥[5]

वाग्व्यापारो तव जपः, शिल्पं पञ्चभूतात्मा पञ्चाङ्गुलिव्यापाररूपः करव्यापारः सर्वोऽपि स्वात्मरूपायास्तव मुदम् एति इति मुद्राः। गतिः पदव्यापारः सर्वोऽपि सर्वत्रानवच्छेदेन वर्तमानायाः तव प्रादक्षिण्येन क्रमणम्। अदनप्रभृतिपानभोगाद्यानन्दः सर्वोऽपि जठराग्निस्वरूपायां त्वयि आहुतिप्रकारः।

अस्मिन् श्लोके तावत् भक्तस्य सहजक्रियाः सर्वाः देव्याः आराधनरूपाः इति वर्णनं देवीं प्रति उत्कृष्टभक्तिभावं प्रकाशयति।

'ददाने दीनेभ्यः श्रियमनिशमाशाऽनुसदृशीम्
अमन्दं सौन्दर्यप्रकरमकरन्दं विकिरति।
तवास्मिन्मन्दारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणः षट्चरणताम्'॥[6]

दरिद्रेभ्यो आशानुसदृशीं श्रियमनिशं ददाने, अमन्दं सौन्दर्यसमूहरसं ददति, अस्मिन् कल्पवृक्षस्तबकमनोहरे तव चरणे निमग्नः सन् मम जीवः भ्रमरो भवतु। अत्र भक्तस्य निरन्तरं देवीपदाम्बुजे एव सक्तः भूयाम् इत्युक्त्या भगवतीविषयकरतिः प्रकाशते।

एवं यद्यपि स्तोत्रकाव्यस्यास्य प्रधानभावः भक्तिरेव, तथापि तस्याङ्गत्वेन, उपस्कारकत्वेन देव्याः नानाविधवर्ननोद्देश्येन च अन्ये भावा अपि अस्मिन् काव्ये समायुक्ताः सन्ति। तदिदानीं पश्यामः।

**औत्सुक्यभावः**

'अधुनैवास्य लाभो ममास्त्विवतीच्छा औत्सुक्यम्'।[7] देव्याः पादजलं पातुमुत्सुकाः सन्तः भगवत्पादाः तां प्रार्थयन्ते-

'कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तवचरणनिर्णेजनजलम्।
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलताम्बूलरसताम्॥ [8]

हे मातः ! कलितालक्तकरसं तव निर्णेजनजलं विद्यार्थी अहं कदा पिबेयम्? यच्चरणोदकं स्वभावजडानां कवित्वशक्तिदानाय वाणीमुखकमलताम्बूलत्वम् आदत्ते। निर्णेजनजलपानमधुनैवास्तु इतीच्छयाऽत्र औत्सुक्यं भावः परिज्ञायते।

---

3 १/१/१ शाङ्करभाष्यम्

4 सौन्दर्यलहरी-श्लोक-१

5 सौन्दर्यलहरी-श्लोक-२७

6 सौन्दर्यलहरी-श्लोक-९०

7 रसगङ्गाधरः प्रथमाननम् (२५ भावः)

8 सौन्दर्यलहरी-९८

**व्रीडाभावः**

स्त्रीणां पुरुषमुखावलोकनादेः, स्त्रीपुरुषाणां च प्रतिज्ञाभङ्ग-पराभवादेः उत्पन्नो वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो व्रीडा। भवान्याः वाणीं स्तुवन्-

'विपञ्च्या गायन्ती विविधमपदानं पशुपतेः
त्वयारब्धे वक्तुं चलितशिरसा साधुवचने।
तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम्' ॥[9]

वीणया शिवस्य नानाविधं महत्कर्म गायन्ती वाणी त्वया मधुरवचसा साधुवचने वक्तुमारब्धे सति, तदीयैर्माधुर्यैः अपहृततन्त्रीकलरवा निजां वीणां चोलेन वस्त्रेण गुप्तमाच्छादयति। भवान्याः वचोमाधुर्यैः सरस्वत्याः विपञ्ची पराजिता। वीणां निभृतं चोलेन निचुलयति इत्यनेन सरस्वत्याः लज्जाभावः प्रकाशितः।

देव्याः चरणसौभाग्यवर्णनावसरे-

'मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते।
चिरादन्तःशल्यं दहनकृतमुन्मीलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा॥ [10]

मिथ्यागोत्रस्खलनं सपत्नीनामग्रहणं कृत्वा वैलक्ष्यनमितं भर्तारं शिवं तव चरणकमले ताडयति सति, पुरा निटिलनयनदहनविहितदाहदुःख-मुद्गीर्णवता कामेन तुलाकोटेः पादाङ्गदस्यात्युग्रशब्दैः किलिकिलध्वनिना चावहसितम्। अत्र वैलक्ष्यनमितमित्यनेन गोत्रस्खलनं कृत्वा शिवः लज्जया शिरोऽवनमनं करोतीति वर्णितम्। एवमत्र शिवस्य व्रीडाभावः द्योत्यते।

रसभावादीनां ध्वनिर्यत्र भवति तदुत्तमकाव्यमिति परिगण्यते। तया दृष्ट्या भगवतीविषयकभावप्रधानमिदं काव्यमप्युत्तमकाव्यपदभाग्भवति। एवं सौन्दर्यलहरी भावसौन्दर्यपूरितं काव्यं वर्तते इति शम्।

---

[9] सौन्दर्यलहरी-६६

[10] सौन्दर्यलहरी ८६